# सांस्कृतिकं क्षेत्रं याजपुरम्

## (राजन्-गच्छत् शब्दयोः प्रयोगः)



उत्कृष्टकलायाः देशः भवति उत्कलः । एषः सम्प्रति ओड़िशा इति प्रसिद्धः । एतत् राज्यं पूर्वं कलिङ्ग-उत्कल–उड्रनामभिः प्रख्यातम् । प्राचीनोत्कलस्य राजधानी आसीत् याजपुरम् । वैतरणीतटे याजपुरम् अवस्थितम् । अत्र विरजादेवी विराजिता भवति । अतः एतत् विरजाक्षेत्रम् इति प्रसिद्धम् । अष्टमशतके अत्र भौमवंशस्य **राजानः** राजधानीं स्थापितवन्तः । दशमशतके सोमवंशस्य राजानः याजपुरे शासनं कृतवन्तः । अतः विरजाक्षेत्रं याजपुरं प्रायः चतुःशतं वर्षाणि राज्यस्य सांस्कृतिकविकाशस्य प्रधानकेन्द्रम् अभवत् ।

सोमवंशराजत्वकाले राज्यस्य प्रभूता उन्नतिः साधिता । सोमवंशस्य **राजसु** ययातिकेशरी सुख्यातः । तत्र ययातिनामानौ द्वौ **राजानौ** आस्ताम् । ताभ्यां **राजभ्यां** बहूनि धर्मपीठानि स्थापितानि । सर्वे **राजानं** चण्डीहरं द्वितीय-ययातिः इति स्वीकुर्वन्ति । सः विरजायाः परमः भक्तः आसीत् । तस्मिन् **राजनि** सर्वे अनुरक्ताः । **राज्ञा** ययातिना दशाश्वमेधयज्ञः अनुष्ठितः । उत्कले भौम-सोम-गङ्गवंशादीनां **राजभिः** बहुमन्दिराणि निर्मितानि । तेषु याजपुरस्य विरजामन्दिरं, वराहमन्दिरं, त्रिलोचनमन्दिरं, सप्तमातृकामन्दिरं च **राज्ञां** कीर्तिं स्मारयन्ति ।



याजपुरस्य शुभस्तम्भः उत्कलीयस्थापत्यस्य निदर्शनं भवति । अत्र रत्नगिरिः, ललितगिरिः, उदयगिरिः इति विश्वप्रसिद्धानि बौद्धपीठानि सन्ति । तत्र **गच्छन्** जनः बौद्धकलां पश्यति । छतिआवटः, व्याससरोवरः, विहारयात्रायाः स्थानम् अशोकझरः, महाविनायकः इति प्रमुखानि दर्शनीयस्थानानि पर्यटकानां मनः हरन्ति ।

याजपुरस्य प्रधानयात्रा भवति वारुणी । तदा नानास्थानेभ्यः **आगच्छन्तः** जनाः वैतरण्यां स्नानं कुर्वन्ति, विरजामन्दिरं **गच्छन्तः** नाभिगयायां पितृभ्यः पिण्डं प्रयच्छन्ति । देशात् विदेशात् सहस्राणि जनाः याजपुरम् आगच्छन्ति । एतत् इतिहासपुराणप्रसिद्धं भवति । अतः प्राचीनराजधानी-याजपुरम् अवश्यं दर्शनीयम्।

| |
|---|
| *स्थापितवन्तः, सुख्यातः, स्वीकुर्वन्ति, स्मारयन्ति, प्रयच्छन्ति, सहस्राणि, दर्शनीयम् ।* |

## टिप्पणी

**शब्दार्थ :**

विराजिता - शोभमाना (ଶୋଭା ପାଉଥିବା) ।

प्रभूता - विपुला (ଅନେକ) ।

साधिता - सम्पन्ना (ହୋଇଅଛି) ।

सुख्यातः - प्रसिद्धः (ପ୍ରସିଦ୍ଧ) ।

आस्ताम् - अभवताम् (ଥିଲେ) ।

निदर्शनम् - उदाहरणम् (ଉଦାହରଣ) ।

प्रयच्छन्ति - प्रदानं कुर्वन्ति (ପ୍ରଦାନ କରନ୍ତି) ।

परमः - श्रेष्ठः (ମହାନ୍) ।

(विरजाक्षेत्रं - वेः - ब्रह्मणः, रात् - यज्ञात्, जाता या सा विरजा, तस्याः क्षेत्रं विरजाक्षेत्रम्)

पितृपुरुषेभ्यः - पितृलोकेभ्यः - (ପିତୃଲୋକଙ୍କୁ) ।

स्मारयन्ति - स्मरणं कारयन्ति - (ସ୍ମରଣ କରାଉଛନ୍ତି) ।

अवश्यम् - नूनम् (ନିଶ୍ଚୟ) ।

## अभ्यासः

**(क) पठत, लिखत च - (गच्छत् शब्दस्य प्रयोगः)**

**प्रथमाविभक्तिः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| गच्छत् | गच्छन् | गच्छन्तौ | गच्छन्तः |
| पठत् | पठन् | ............... | पठन्तः |
| क्रीड़त् | ............... | क्रीड़न्तौ | क्रीड़न्तः |
| वदत् | वदन् | वदन्तौ | ............... |
| राजन् | राजा | राजानौ | राजानः |

## द्वितीयाविभक्ति:

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| गच्छत् | गच्छन्तम् | गच्छन्तौ | गच्छत: |
| पठत् | पठन्तम् | पठन्तौ | .............. |
| क्रीड़त् | क्रीड़न्तम् | ................. | क्रीड़त: |
| वदत् | वदन्तम् | ................. | वदत: |
| राजन् | राजानम् | राजानौ | राज्ञ: |

## तृतीयाविभक्ति:

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| गच्छत् | गच्छता | गच्छद्भ्याम् | गच्छद्भि: |
| पठत् | पठता | ................. | पठद्भि: |
| क्रीड़त् | क्रीड़ता | क्रीड़द्भ्याम् | ................. |
| नयत् | ................. | नयद्भ्याम् | नयद्भि: |
| राजन् | राज्ञा | राजभ्याम् | राजभि: |

## चतुर्थीविभक्ति:

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| गच्छत् | गच्छते | गच्छद्भ्याम् | .............. |
| पठत् | पठते | ................. | पठद्भ्य: |
| क्रीड़त् | क्रीड़ते | क्रीड़द्भ्याम् | ............... |
| वदत् | वदते | वदद्भ्याम् | ................. |
| राजन् | राज्ञे | राजभ्याम् | राजभ्य: |

## पञ्चमीविभक्ति:

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| गच्छत् | गच्छत: | गच्छद्भ्याम् | गच्छद्भ्य: |
| तिष्ठत् | तिष्ठत: | तिष्ठद्भ्याम् | .............. |
| क्रीड़त् | ................. | ................. | क्रीड़द्भ्य: |
| पश्यत् | पश्यत: | ................. | पश्यद्भ्य: |
| राजन् | राज्ञ: | राजभ्याम् | राजभ्य: |

## षष्ठीविभक्ति:

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| गच्छत् | गच्छत: | गच्छतो: | गच्छताम् |
| पठत् | पठत: | पठतो: | पठताम् |
| क्रीड़त् | क्रीड़त: | क्रीड़तो: | ................. |
| पश्यत् | पश्यत: | ................. | पश्यताम् |
| राजन् | राज्ञ: | राज्ञो: | राज्ञाम् |

### सप्तमीविभक्तिः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| गच्छत् | गच्छति | गच्छतोः | गच्छत्सु |
| पठत् | पठति | पठतोः | ............... |
| क्रीड़त् | ................. | क्रीड़तोः | क्रीड़त्सु |
| पश्यत् | पश्यति | .................. | पश्यत्सु |
| राजन् | राजनि, राज्ञि | राज्ञोः | राजसु |

### सम्बोधने

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| गच्छत् | गच्छन्! | गच्छन्तौ! | गच्छन्तः! |
| पश्यत् | पश्यन्! | पश्यन्तौ! | ................. |
| क्रीड़त् | क्रीड़न्! | .................. | क्रीड़न्तः! |
| राजन् | राजन्! | राजानौ! | राजानः! |

गच्छत् - ଯାଉଥିବା/ଯାଉଯାଉ, पठत् - ପଢୁଥିବା/ପଢୁପଢୁ, क्रीडत् - ଖେଳୁଥିବା/ଖେଳୁଖେଳୁ, वदत् - କହୁଥିବା/କହୁକହୁ, नयत् - ନେଉଥିବା/ନେଉନେଉ, पश्यत् - ଦେଖୁଥିବା/ଦେଖୁଦେଖୁ, राजन् - ରାଜା ।

**(ख) सावधानं पठत -**

(१) छात्रः पठनसमकालं लिखति ⟶ छात्रः लिखन् पठति ।

(२) शिशवः पठनसमकालं क्रीड़न्ति ⟶ शिशवः क्रीड़न्तः पठन्ति ।

(३) सुधांशुः भ्रमणसमकालं पठति ⟶ सुधांशुः पठन् भ्रमति ।

(४) अंशुमान् खादनसमकालं गच्छति ⟶ अंशुमान् गच्छन् खादति ।

(५) अविनाशः लिखनसमकालं स्मरति ⟶ अविनाशः स्मरन् लिखति ।

(ग) 'गच्छत्' शब्दस्य प्रयोगः -

(१) रामः विद्यालयं गच्छन् अस्ति ।

(२) बालकौ विद्यालयं गच्छन्तौ आस्ताम् ।

(३) गृहं गच्छन्तः पथिकाः वृक्षमूले विश्रामं नीतवन्तः ।

(४) जितेन्द्रः गच्छन्तं रामम् अपश्यत् ।

(५) पिता विपणीं गच्छतः पुत्रान् आहूतवान् ।

(६) गच्छता दुर्जनेन सह आलापं न कुरु ।

(७) प्रभातः गच्छते शिशवे मोदकं ददाति ।

(८) पूजकः मन्दिरम् आगच्छद्भ्यः भक्तेभ्यः प्रसादं वितरति ।

(९) गच्छतः बालकस्य स्यूतः नास्ति ।

(१०) गच्छत्सु जनेषु धावन् अग्रगामी ।

१. **योग्यपदेन शून्यस्थानं पूरयत -**

यथा - राजा न्यायं करोति । (राजन् - प्रथमा-एकवचने)

(क) यात्रिकाः .................. यानेन गच्छन्ति । (पश्यत् - प्रथमा-बहुवचने)

(ख) कर्मकरौ .................. वार्त्तालापं कुरुतः । (गच्छत् - प्रथमा-द्विवचने)

(ग) यूयं .................. मा गच्छथ । (खादत् - प्रथमा-बहुवचने))

(घ) आवां कार्यं .................. बालकौ पश्यावः । (कुर्वत् - द्वितीया-द्विवचने)

(ङ) शिक्षकः .................. छात्रं वदति । (पठत् - द्वितीया-एकवचने)

(च) दरिद्रः .................. प्रार्थयति । (राजन् - द्वितीया-एकवचने)

(छ) माता .................. शिशुं पश्यति । (क्रीड़त् - द्वितीया-एकवचने)

(ज) .................. छात्रस्य यानं नास्ति । (गच्छत् - षष्ठी-एकवचने)

(ञ) .................. देशस्य रक्षकाः । (राजन् - प्रथमा-बहुवचने)

२. **बन्धनीमध्यस्थयथार्थशब्दैः शून्यस्थानं पूरयत -**

(क) ऋषिः .................... जपति ।

(ख) नर्त्तकाः .................... गायन्ति ।

(ग) ते .................... पश्यन्ति ।

(घ) प्राक् .................... प्रजावत्सलाः आसन् ।

(ङ) प्रजाः .................... वदन्ति ।

(च) नित्यं विद्यालयं ................... छात्राः उत्तमं पठन्ति ।

(छ) पितृभ्यः ................... प्रयच्छन्ति ।

(ज) ................... वार्त्तां कुरुतः ।

(झ) ................... विक्रमादित्यः प्रसिद्धः ।

(ञ) छात्राः ................... लिखन्ति ।

| |
|---|
| **राजानम्, शृण्वन्तः नृत्यन्तः, पिण्डम्, राजानौ, उपविशन्, राजानः, धावन्तः, राजसु, गच्छन्तः** |

३. **एकपदेन उत्तरं लिखत -**

(क) सोमवंशे कः सुख्यातः ?

(ख) याजपुरे का विराजिता ?

(ग) कः उत्कलीयस्थापत्यस्य निदर्शनम् ?

(घ) कः दशाश्वमेधयज्ञं कृतवान् ?

(ङ) का प्राचीनोत्कलस्य राजधानी आसीत् ?

४. **उचितपदेन शून्यस्थानं पूरयत -**

(क) तस्मिन् ............... सर्वे अनुरक्ताः (राजे, राज्ञे, राजनि)

(ख) विरजायाः ............... भक्तः आसीत् । (चरमः, परमः, नरमः)

(ग) मन्दिराणि .............. कीर्त्तिं स्मारयन्ति । (राजानाम्, राज्ञाम्, राजनाम्)

(घ) बौद्धपीठेषु ............... अन्यतमः । (विन्ध्यगिरिः, उदयगिरिः, अस्तगिरिः)

(ङ) जनाः ................ स्नानं कुर्वन्ति । (कूपे, वैतरण्यां, प्रान्तरे)

५. **मातृभाषया अनुवादं कुरुत -**

(क) तस्मिन् राजनि सर्वे अनुरक्ताः ।

(ख) वैतरणीतटे याजपुरम् अवस्थितम् ।

(ग) ताभ्यां राजभ्यां बहूनि धर्मपीठानि स्थापितानि ।

(घ) तत्र गच्छन् जनः बौद्धकलां पश्यति ।

६. **विक्षिप्तवर्णैः शुद्धं शब्दं लिखत -**

त गि ल लि रिः, धा के प्र न न्द्र म्, पी नि र्म ठा ध, हा वि म य कः ना ।

७. **स्तम्भमेलनं कुरुत -**

| 'क' स्तम्भः | 'ख' स्तम्भः |
|---|---|
| जनाः | बौद्धपीठम् |
| राज्ञा | विराजिता |
| याजपुरं | आगच्छन्तः |
| रत्नगिरिः | ययातिना |
| विरजा | दर्शनीयम् |

८. **संशोधनं कुरुत -**

(क) प्राक् <u>राजा</u> प्रजानुरञ्जकाः आसन् ।

(ख) भक्ताः मन्दिरं <u>गच्छता</u> देवं प्रणमन्ति ।

(ग) मन्त्री <u>राजां</u> कथयति ।

(घ) याजपुरं वैतरणीतटे <u>अवस्थिता</u> ।

९. **वाक्येषु व्यवहरत -**

सहस्राणि, गच्छन्तः, राजसु, सुख्यातः, आसीत् ।

●